## अन्याः ।

1. जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ।।

2. कस्त्वं लोहितलोचनास्यचरणो हंसः कुतो मानसात्
किं तत्रास्ति सुवर्णपङ्कवनान्यंभः सुधासन्निभं ।
रत्नान्नं निचयं प्रवालमणयो वैढूर्यरोहा क्वचि-
च्छबूका अपि सति नेति च बकैराकर्ण्य हीहीकृतम् ।।

3. काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः ।।

4. हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणं ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ।।

5. कृतस्य कारणं नास्ति मृतस्य मरणं तथा ।
गतस्य शोचनं नास्ति ह्येतद् वेदविदां मतम् ।।

6. लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।।

7. सर्वेन्द्रियाणि संयम्य बकवत् श्रद्धयान्वितः ।
कालदेशोपपन्नानि सर्वकार्याणि साधयेत् ।।

8. पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः ।।

9. पादपानां भयं वातात् पत्मानां शिशिरात् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनात् भयम् ।।

10. शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा
ऊहापोहो र्थविज्ञानं तत्वज्ञानं च धी गुणाः ।।

11. काव्यशास्त्रविनोदेन कालो गच्छति धीमतां ।
व्यसनेन च मूर्खानां निद्रया कलहेन च ।।

12. अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ।।

13. इपरकर्मफलानि यथासुखं विलिख तानि सखे कमलासन ।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ।।

14. त्यजन्ति मित्राणि गुणैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति ह्यर्थो हि लोके पुरुषस्यबन्धु ।।